Digitization by eGangotri-South Center

ஸரள ஸம்ஸ்க்ருத சிக்ஷக்

(தமிழ்)

பாகம் ஏழு

ஸம்ஸ்க்ருத விச்வ பரிஷத்தின் தரப்பில்
பாரதீய வித்யாபவனத்தினால் நடத்தப்படும் பரீக்ஷைப் பிரிவு

ஸம்பாதகர்கள்

ஜயந்தக்ருஷ்ண ஹ.தவே, மா. நியாமகர்,
பா.வி.ப. சுப்ரமணிய சாஸ்திரி, ஆசார்யர்,
மு.ஸம்.ப. மஹேச் சந்த்ர சாஸ்த்ரீ, வித்யாபாஸ்கர்,
பரீக்ஷா மந்த்ரீ

பாரதீய வித்யாபவனம்
சௌபாதி ரோடு,
பம்பாய் - 7.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

வெளியிடுவோர் :
திரு. P.V. சங்கரன் குட்டி.,
பாரதீய வித்யா பவன்,
சௌபாத்தி, மும்பாய் – 7.

மறுபதிப்பு : 1000 பிரதிகள் (2007)
விலை : ரூபாய் 15.00

அச்சிட்டோர் :
சென்னை மைக்ரோ பிரிண்ட் (பி) லிமிடெட்,
சென்னை – 29. போன் : 2374 00 99.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

முகவுரை

'ஸரள ஸம்ஸ்கிருத சிக்ஷை'யினுடைய இந்த பாகமானது 'ஸம்ஸ்கிருத கோவித' பரீக்ஷையின் ப்ரதமப்ரச்ன பத்ரத்திற்கு (முதலாவது வினுத்தாளுக்கான) பாடப் புத்தகமாக நிச்சயிக்கப்பட்டிருக்கிறது.

இந்த பாகத்திலிருந்து க்ரியாபதவிசாரமானது (வினைச் சொற்களைப்பற்றிய விரிவுரை) ஆரம்பிக்கப்படுகிறது. ஸம்ஸ்கிருத பாஷையில் தாது ரூபங்களுக்குத் தனிப் பெருமை உண்டு. ஆகையால் தாது ரூபங்கள் இப்புத்தகத்தில் விரிவாக எடுத்துரைக்கப்பட்டிருக்கின்றன. இந்த பாகத்தில் லகாரங்களுடைய பரிசயமும் கொடுக்கப்படுகிறது. முகற்கணத்தைச் சேர்ந்த பரஸ்மைபதம், ஆத்மனேபதம், உபயபதம், ஆகிய தாதுக்களுடைய ரூபங்களும் அவைகளை செயல் படுத்தும் முறையும் விரிவாக கொடுக்கப்பட்டுள்ளன. க்ரியாபதங்களைப் பற்றிய விரிவுரையில் அதற்கிடையிடையே உரை நடைகளும், (கத்யங்களும்) செய்யுள்களும், (பத்யங்களும்) நாடகங்களிலிருந்து எடுக்கப்பட்ட பகுதிகளும் சேர்க்கப்பட்டிருக்கின்றன.

இப்புத்தகத்தில் புதிய சப்தங்களும், வினைச்சொற்களும் கொடுக்கப்பட்டிருக்கின்றன. அவைகளை ஆதாரமாகக் கொண்டு ஸம்ஸ்கிருத மொழியில் முடிந்தவரையில் வாக்யங்களை எழுதிப் பயிற்சி செய்ய வேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பொருளடக்கம்

1.	धैर्यं धरति स बुद्धिमान्	...	1
2.	தாதுக்கள் (பத்தாவது கணம்)	...	2
3.	हंसः	...	8
4.	உபயபத தாதுக்கள்	...	12
5.	रामस्य लंकां प्रति गमनम्	...	15
6.	உபயபத தாதுக்கள்	...	18
7.	वसन्तसेना गमन निवेदनम्	...	22
8.	தாதுக்கள் (ஆறாவது கணம்)	...	30
9.	भगीरथ वरप्रदानम्	...	36
10.	वृक्षः	...	39
11.	பரஸ்மைபத தாதுக்கள் (நான்காவது கணம்)		43
12.	त्रिजटास्वप्नवर्णनम्	...	47
13.	பரஸ்மைபத தாதுக்கள் (நான்காவது கணம்)		50
14.	प्रथमः परिचयः शकुन्तलादुष्यन्तयोः	...	53
	தாதுக்கள் (இரண்டாவது கணம்)	...	58
16.	वर्षासमयः	...	61
17.	उर्वशीपुरुरवसोः सुतसङ्गमः	...	65
18.	பரஸ்மைபத தாதுக்கள் (மூன்றாவது கணம்)		71

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ஸரள ஸம்ஸ்கிருத சிக்ஷா

(தமிழ்)

[பாகம் 7]

பாடம். 1

धैर्यं धरति सः बुद्धिमान्

एकस्मिन् महारण्ये कश्चित् सिंहः आसीत्। वनस्य नातिदूरे एव सरः आसीत्। तस्मिन् सरसि एकः मण्डूकः अवात्सीत्। कदाचित् मृगेन्द्रः जलं पातुं सरस्तस्य तीरमगच्छत्। जले स्थितस्य तस्य भेकस्य रटनं श्रुत्वा सिंहः भयेन अकम्पत। स परितः विलोक्य अवादीत्–'अहो!' भीषणा ध्वनिः, कुतः इयं समागच्छतीति ज्ञातुं न शक्नोमि। न कोऽपि अत्र दृष्टिपथं आयाति। भयानको जन्तुः, किं पलाय्य प्राणरक्षा कर्तव्या इदानीम्'? नहि नहि, आपत्सु धैर्यं धरन्ति बुद्धिमन्तः। एवं विचार्य स तत्रैव स्थितः। यावत् भयकारणं ध्यायति, तावत् स मण्डूकः, उत्प्लुत्य तीरमगच्छत्। स पुनरपि उच्चैः रटन् तत्रैव सरसः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तीरे अतिष्ठत्। तं दृष्ट्वा सिंहः क्रुद्धो भूत्वा अवादीत्– अरे, ईदृक् स्वल्पकायः जन्तुः मृगेन्द्रं मां उद्वेजयति इति। ततः स तं भेकं आक्रम्य पादप्रहारेण धूलिसात् अकरोत् अभाणीच्च—

शोकस्थानसहस्राणि भयस्थानशतानि च।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम्॥

[बालसंस्कृतम्]

शब्दार्थाः

1. अवात्सीत् = வசித்து வந்தது.
2. मृगेन्द्रः = சிங்கம்.
3. भेकस्य = தவளையினுடைய.
4. पलाय्य = ஓடி.
5. उत्प्लुत्य = மேலே எழும்பி.
6. रटन् = சப்திக்கின்ற.
7. उद्वेजयति = பயப்படும்படி செய்கிறது.
8. धूलिसात् = புழுதி மயமாக.
9. अभाणीत् = கூறியது.
10. आविशन्ति = சூழ்கின்றன.

उद्वेजयति = ओविजी-भयचलनयोः प्रथमपुरुषैकवचनान्तः।
अभाणीत् = भण -शब्दार्थः - प्रथमपुरुषैकवचनान्तः।
आविशन्ति = विश - प्रवेशने - प्रथमपुरुषबहुवचनान्तः।

———

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 2

பத்தாவது கணத்தைச் சேர்ந்த தாதுக்கள்.

இதுவரையில் முதலாவது கணத்தின் தாதுக்களைப் பற்றி விரிவாக எடுத்துரைக்கப்பட்டது. முதலாவது கணத்தினுடைய பரஸ்மைபத, ஆத்மனேபத ரூபங்களும் சொல்லப் பட்டன. மேலும் எல்லா லகாரங்களுடைய ரூபங்களின் நிர்தேசமும் கொடுக்கப்பட்டது. இப்பொழுது பத்தாவது கணத்தின் தாதுக்களைப் பற்றிய விரிவுரை கொடுக்கப் படுகிறது. முதலாவது கணத்தின் தாது ரூபங்களுக்கும் பத்தாவது கணத்தின் தாது ரூபங்களுக்கும் விசேஷ மாறுபாடு கிடையாது.

மூதலாவது கணத்தைச் சேர்ந்த தாதுக்களுக்கு, தாதுவிற்கும் ப்ரத்யயத்திற்கும் நடுவில் 'अ' என்று வருகிறது. பத்தாவது கணத்தைச் சேர்ந்த தாதுக்களுக்கு, தாதுவிற்கும் ப்ரத்யயத்திற்கும் நடுவில் "अय" என்று வருகிறது. இதைத் தவிர இரண்டுமே அநேகமாக ஒன்றுதான்.

உதாஹரணம்: —

(अर्च=पूजायाम्)

अर्च् = பூஜை செய்தல்

முதற் கணம்.	பத்தாவது கணம்.	
अर्चति	अर्चयति	(நிகழ காலம்)
अर्चिष्यति	अर्चयिष्यति	(எதிர் காலம்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(பத்தாவது கணம்)

I लट् (நிகழ் காலம்)

பரஸ்மை பதம்.

ஒருமை.	இருமை.	பன்மை.	
अर्चयति	अर्चयतः	अर्चयन्ति	ப்ரதம புருஷன்.
अर्चयसि	अर्चयथः	अर्चयथ	மத்யம புருஷன்.
अर्चयामि	अर्चयावः	अर्चयामः	உத்தம புருஷன்.

ஆத்மனே பதம்

अर्चयते	अर्चयेते	अर्चयन्ते	ப்ரதம புருஷன்.
अर्चयसे	अर्चयेथे	अर्चयध्वे	மத்யம புருஷன்.
अर्चये	अर्चयावहे	अर्चयामहे	உத்தம புருஷன்.

II लिट् (अनद्यतनपरोक्षभूतकलः) (இறந்த காலம்)

பரஸ்மை பதம்

अर्चयांचकार	अर्चयांचक्रतुः	अर्चयांचक्रुः ।	ப்ரதம புருஷன்.
अर्चयांचकर्थ	अर्चयांचक्रथुः	अर्चयांचक्र ।	மத்யம புருஷன்.
अर्चयांचकार	अर्चयांचकृव	अर्चयांचकृम ।	உத்தம புருஷன்.

இறந்த காலத்தைக் குறிக்கின்ற 'लिट्' லகாரத்தில் **अर्चयां** என்பதற்குப் பின்னால், **आस, बभूव** என்ற க்ரியா ரூபங்களோயம் சேர்த்துச் சொல்லலாம்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

உதாஹரணம் :—

अर्चयामास	अर्चयामासतुः	अर्चयामासुः	ப்ரதம புருஷன்.
अर्चयांबभूव	अर्चयांबभूवतुः	अर्चयांबभूवुः	ப்ரதம புருஷன்.

III लुट् (अनद्यतनभविष्यत्कालः) (எதிர்காலம்)

பரஸ்மை பதம்

अर्चयिता	अर्चयितारौ	अर्चयितारः	ப்ரதம புருஷன்
अर्चयितासि	अर्चयितास्थः	अर्चयितास्थ	மத்யம புருஷன்.
अर्चयितास्मि	अर्चयितास्वः	अर्चयितास्मः	உத்தம புருஷன்.

ஆத்மனே பதம்

अर्चयिता	अर्चयितारौ	अर्चयितारः	ப்ரதம புருஷன்.
अर्चयितासे	अर्चयितासाथे	अर्चयिताध्वे	மத்யம புருஷன்.
अर्चयिताहे	अर्चयितास्वहे	अर्चयितास्महे	உத்தம புருஷன்.

IV लृट् (सामान्यभविष्यत्कालः) (எதிர்காலம்)

பரஸ்மை பதம்

अर्चयिष्यति	अर्चयिष्यतः	अर्चयिष्यन्ति	ப்ரதம புருஷன்.
अर्चयिष्यसि	अर्चयिष्यथः	अर्चयिष्यथ	மத்யம புருஷன்.
अर्चयिष्यामि	अर्चयिष्यावः	अर्चयिष्यामः	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ஆத்மனே பதம்

अर्चयिष्यते	अर्चयिष्येते	अर्चयिष्यन्ते	ப்ரதம புருஷன்.
अर्चयिष्यसे	अर्चयिष्येथे	अर्चयिष्यध्वे	மத்யம புருஷன்.
अर्चयिष्ये	अर्चयिष्यावहे	अर्चयिष्यामहे	உத்தம புருஷன்.

V लोट् (आज्ञार्थः) (கட்டளை)

பரஸ்மை பதம்

अर्चयतु अर्चयतात्	अर्चयताम्	अर्चयन्तु	ப்ரதம புருஷன்.
अर्चय अर्चयतात्	अर्चयतम्	अर्चयत	மத்யம புருஷன்.
अर्चयानि	अर्चयाव	अर्चयाम	உத்தம புருஷன்.

ஆத்மனே பதம்

अर्चयताम्	अर्चयेताम्	अर्चयन्ताम्	ப்ரதம புருஷன்.
अर्चयस्व	अर्चयेथाम्	अर्चयध्वम्	மத்யம புருஷன்.
अर्चयै	अर्चयावहै	अर्चयामहै	உத்தம புருஷன்.

भक्ष = अदने

VI लङ् (अनद्यतनभूतकालः) (இறந்த காலம்)

பரஸ்மை பதம்

अभक्षयत्	अभक्षयताम्	अभक्षयन्	ப்ரதம புருஷன்.
अभक्षयः	अभक्षयतम्	अभक्षयत	மத்யம புருஷன்.
अभक्षयम्	अभक्षयाव	अभक्षयाम	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center.

ஆத்மனே பதம்

अभक्षयत	अभक्षयेताम्	अभक्षयन्त	ப்ரதம புருஷன்.
अभक्षयथाः	अभक्षयेथाम्	अभंक्षयध्वम्	மத்யம புருஷன்.
अभक्षये	अभक्षयावहि	अभक्षयामहि	உத்தமபுருஷன்.

VII लिङ् (विध्यर्थः) (தூண்டுதல்.)

பரஸ்மை பதம்

भक्षयेत्	भक्षयेताम्	भक्षयेयुः	ப்ரதம புருஷன்.
भक्षयेः	भक्षयेतम्	भक्षयेत	மத்யம புருஷன.
भक्षयेयम्	भक्षयेव	भक्षयेम	உத்தம புருஷன்.

ஆத்மனே பதம்

भक्षयेत	भक्षेयेयाताम्	भक्षयेरन्	ப்ரதம புருஷன்.
भक्षयेथाः	भक्षयेयाथाम्	भक्षयेध्वम्	மத்யம புருஷன்.
भक्षयेय	भक्षयेवहि	भक्षयेमहि	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 3

हंसः

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥ १ ॥

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥ २ ॥

अपसरणमेव शरणं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचाटष्टिट्टिभो यत्र ॥ ३ ॥

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।
अवकरनिकरं विकिरति तत्किं कुक्कुटाकुरिव हंसः ॥ ४ ॥

नीर-क्षीर-विवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ ५ ॥

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस ! तव सैव शुभ्रता चीयते न च न चापचीयते ॥

यत्रापि कुत्रापि भवन्ति हंसा
हंसा महीमण्डलमण्डनानि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः ॥ ७ ॥

अम्भोजिनीवनविलासनमेव हन्त
हंसस्य हन्तु नितरां कुपितो विधाता ।
नत्वस्य दुग्धजलभेदविदौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ ८ ॥

भृङ्गाङ्गनाजनमनोहरहारिगीत—
राजीषरेणुकणकीर्णपिशङ्गनीराम् ।
रम्यां हिमाचलनदीं प्रविहाय हंस
हे हे हताश वद कां दिशमुत्सुकोऽसि ॥ ९ ॥

हंसः प्रयाति शनकैर्यदि यातु तस्य
नैसर्गिकी गतिरियं नहि तत्र चित्रम् ।
गत्या तया जिगमिषुर्बक एव मूढः
चेतो दुनोति सकलस्य जनस्य नूनम् ॥ १० ॥

मुक्ता मृणालपटली भवता निपीता—
न्यम्बूनि यत्र नलिनानि निषेवितानि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हे राजहंस ! वद तस्य सरोवरस्य–
कृत्येन केन भवितासि कृतोपकारः ॥ ११ ॥

कस्त्वं लोहितलोचनास्यचरणः ? हंसः, कुतो ? मानसात् ।
किं तत्रास्ति ? सुवर्णपङ्कजवनान्यम्भः सुधासन्निभम् ।
रत्नानां निचयाः प्रवालमणयो वैडूर्यरोहाः क्वचित् ।
शम्बूका अपि सन्ति? नेति, च बकैराकर्ण्य ही ही कृतम्॥

काके कार्ष्ण्यमलौकिकं धवलिमा हंसे निसर्गस्थितो–
गाम्भीर्ये महदन्तरं वचसि यो भेदः स किं कथ्यते ।
एतावत्सु विशेषणेष्वपि सखे यत्रेदमालोक्यते
के काकाः खलु के च हंसशिशवो देशाय तस्मै नमः ॥

क्रुद्धोलूकनखप्रपातविगलत्पक्षा अपि स्वाश्रयं
ये नोज्झन्ति पुरीषपुष्टवपुषस्ते केचिदन्ये द्विजाः ।
ये तु स्वर्गतरङ्गिणीबिसलतालेशेन संवर्धिता
गाङ्गं नीरमपि त्यजन्ति कलुषं ते राजहंसा वयम् ॥

शब्दार्थाः

1. नीरम् = தண்ணீர்.
2. नीरजम् = தாமரை.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. मरालस्य = அன்னப்பறவையினுடைய.
4. मानसम् = மனம்.
5. मानसम् = மானஸஸரோவரம் (திபெத்தைச் சேர்ந்த இமயமலைப்பகுதியிலுள்ள புகழ் பெற்ற ஏரி)
6. पल्वलः = குட்டை, சிறிய நீர்த்தேக்கம்.
7. टिट्टिभः = 'டிட்டிபம்' என்னும் ஒருவித பறவை.
8. अवकरनिकरम् = குப்பை மேடு.
9. कूजनाङ्कः = சேவல்.
10. चीयते = வளருகிறது, விருத்தியடைகிறது.
11. अपचीयते = குறைக்கப் படுகிறது.
12. अम्भोजिनी = தாமரை ஓடை.
13. वैदग्ध्यं = ஸாமர்த்தியம், சாதுர்யம்.
14. अपहर्तुं = பறித்துக்கொள்வதற்கு.
15. राजीवम् = தாமரை.
16. रेणुकणः = புழுதி.
17. जिगमिषुः = செல்ல விருப்பமுள்ளவன்.
18. दुनोति = துக்கத்தை உண்டுபண்ணுகிறது, தாபப்படுத்துகிறது.
19. सुधासन्निभम् = அமிருதத்திற்கு நிகரானது.
20. निचयाः = கூட்டங்கள்.
21. वैदूर्यरोहाः = வைடூர்யத்தின் முளைகள்.
22. शम्बूकाः = சங்கு.
23. उलूकः = ஆந்தை.
24. उज्झन्ति = விடுகின்றன.
25. विसलता = தாமரைத் தண்டு.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. भक्तः परमेश्वरं चिन्तयते ।
7. सेवकः आमलकान् चूर्णयति ।
8. अश्वं ताडयते सूतः ।
9. स्वर्णकारः स्वर्णं तोलयते ।
10. न्यायाधीशः स्तेनं दण्डयति ।

கீழே கொடுக்கப்பட்டுள்ள வாக்கியங்களை ஸம்ஸ்கிருதத்தில் மொழிபெயர்க்கவும்:—

1. நீ என்ன எண்ணுகிறாய் ?
2. நான் ரூபாயை எண்ணிக்கொண்டிக்கிறேன்.
3. அவன் எதைப் பிடித்துக்கொண்டிருக்கிறான் ? (கட்டிக்கொண்டிருக்கிறான் ?)
4. பையன் வெளிக் கிளம்பிக்கொண்டிருக்கிறானா?
5. அவன் தர்மசிந்தனை செய்கிறான்.
6. குதிரைகளை எவன் மேய்க்கிறான்?
7. உபாத்தியாயர் படிப்பு விஷயமாக யோசனை செய்து கொண்டிருக்கிறார்.
8. நீ ஏன் அவனை வீணாக அதட்டிக் கொண்டிருக்கிறாய் ?
9. அவன் எதை நிறுத்திக்கொண்டிருக்கிறான் ?
10. ராமன் யாருக்கும் துக்கத்தைக் கொடுக்க மாட்டான்.

———

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 5.

रामस्य लङ्कां प्रति गमनम्

स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत् ॥ १ ॥

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥ २ ॥

प्रवृत्तावुपलब्धायां तस्यास्सम्पातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ३ ॥

दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ४ ॥

तस्यै भर्तुरभिज्ञानं अङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥ ५ ॥

निर्वाप्य प्रियसन्देशैः सीतां अक्षवधोद्यतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६ ॥

प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः।
न केवलं भुवः पृष्ठे व्योम्नि सम्बाधवर्तिभिः ॥ ८ ॥

निविष्टमुदधेः कूले तं प्रपेदे विभीषणः।
स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमादिश्य चोदितः ॥ ९ ॥

तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ १० ॥

स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥ ११ ॥

तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ १२ ॥

(रघुवंशम्)

शब्दार्थाः

1. **चेरुः** = சஞ்சரித்தன. சுற்றின.
2. **प्रवृत्तिः** = சமாசாரம், செய்தி.
3. **निर्वाप्य** = திருப்திப்படுத்தி, சந்தோஷப்படுத்தி. ஸமாதானப்படுத்தி. (**सुखयित्वा**) சுகப்படுத்தி.
4. **हरिः** = வானரம் (குரங்கு)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. अनुद्रुतः = கூடியவராக, பின்தொடரப்பட்டவன். (अन्वितः)
6. प्रतिशुश्राव = ப்ரதிக்ஞை செய்தார்.
7. बध्नन्ति = நிச்சயிக்கின்றன (குறிப்பிட்ட பலனைக் கொடுக்கின்றது.)
8. प्लवगैः = வானரங்களால்.
9. उन्मग्नम् = மேலே எழும்பியுள்ள.
10. रोधयामास = ஆக்கிரமித்தனர், சூழ்ந்தனர்.

———

CC-0. In Public Domain. Cuddalore Collection, TN.

Digitization by eGangotri-South Center

பாடம். 6

பத்தாவது கணத்தைச் சேர்ந்த உபயபத தாதுக்கள்.

(தொடர்ச்சி)

1. धृ = (धृञ् = धारणे) (णिच्) தரித்தல்.
धारयति धारयते। धारयिष्यति, धारयिष्यते।

2. पार = (पॄ = पूरणे) முடித்தல், நிரப்புதல்.
पारयति, पारयते। पारयिष्यति, पारयिष्यते।

3. पीड् = (पीड = अवगाहने) துக்கத்தை உண்டு பண்ணுதல்.
पीडयति, पीडयते। पीडयिष्यति, पीडयिष्यते।

4. पुष् = (पुष = धारणे) பேணுதல், பேணி வளர்த்தல், ஆதரித்தல்.
पोषयति, पोषयते। पोषयिष्यति, पोषयिष्यते।

5. पूज् = (पूज = पूजायां) பூஜித்தல், கௌரவித்தல்.
पूजयति, पूजयते। पूजयिष्यति, पूजयिष्यते।

6. पाल् = (पाल = रक्षणे) ரக்ஷித்தல், காப்பாற்றுதல்.
पालयति, पालयते। पालयिष्यति, पालयिष्यते।

7. बन्ध् = (बन्ध = संयमने) கட்டுதல்.
बन्धयति, बन्धयते। बन्धयिष्यति, बन्धयिष्यते।

8. भूष् = (भूष = अलङ्करणे) அலங்கரித்தல்.
भूषयति, भूषयते। भूषयिष्यति, भूषयिष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. मार्ग् = (मार्ग = अन्वेषणे) தேடுதல்.
मार्गयति, मार्गयते। मार्गयिष्यति, मार्गयिष्यते।

10. मार्ज् = (मृजू = शौचालङ्कारयोः) பெருக்கி சுத்தம் செய்தல்.
मार्जयति, मार्जयते। मार्जयिष्यति, मार्जयिष्यते।

11. मुच् = (मुच = प्रमोचने) விடுவித்தல்.
मोचयति, मोचयते। मोचयिष्यति, मोचयिष्यते।

12. मृष् = (मृष = तितिक्षायां) பொறுத்துக்கொள்ளுதல்.
मर्षयति, मर्षयते। मर्षयिष्यति, मर्षयिष्यते।

13. रच् = (रच = प्रतियत्ने) செய்தல்.
रचयति, रचयते। रचयिष्यति, रचयिष्यते।

14. वर्ध् = (वृधु = भाषार्थाः) அபிவிருத்தியடைதல், வளருதல்.
वर्धयति, वर्धयते। वर्धयिष्यति, वर्धयिष्यते।

15. सान्त्व् = (षान्त्व = सामप्रयोगे) சமாதானப்படுத்துதல்.
सान्त्वयति, सान्त्वयते। सान्त्वयिष्यति, सान्त्वयिष्यते।

16. स्तेन् = (स्तेन = चौर्ये) திருடுதல்.
स्तेनयति, स्तेनयते। स्तेनयिष्यति, स्तेनयिष्यते।

संस्कृतवाक्यानि

१. सा नारी भूषणानि धारयति।

२. लेखकः सः स्वकीयं लेखनकार्यं श्वः पारयिष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. कः अस्मान् इव पीडयति ।

४. पशुपक्षिणः स्वशावकान् पोषयन्ति ।

५. पूजयति सज्जनान् सः धनिकः ।

६. पशून् पालयन्ति कृषकाः ।

७. गोष्ठे बन्धयति धेनुं कृष्णः ।

८. प्रधानमन्त्रिणः स्वागतार्थं जनाः मार्गं भूषयन्ते ।

९. साधवः सन्मार्गं मार्गयन्ति ।

१०. धीराः मर्षयन्ति आगतान् कष्टान् ।

கீழே கொடுக்கப்பட்டுள்ள வாக்கியங்களை ஸம்ஸ்கிருதத்தில் மொழி பெயர்க்கவும் :—

1. அவன் திருடமாட்டான்.
2. அவனை யார் சாந்தப்படுத்துவார் ?
3. நான் அவனுடைய வீட்டிற்குப்போய் அவனை சமாதானப்படுத்துவேன்.
4. அவன் தனது பலத்தை விருத்தி செய்து கொள்ளுகிறான்.
5. யார் தான் தனது சக்தியை அதிகப்படுத்திக் கொள்ளமாட்டார் ?
6. நீ ஏன் தன்னை அலங்கரித்துக்கொள்ள வில்லை ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. நான் பசுக்களை வளர்க்கப்போகிறேன்.
8. யார் பாத்திரம் தேய்த்துக்கொண்டிருக்கிறார் ?
9. காந்திஜி தன்னுடைய பாத்திரத்தை தானே தேய்த்துக் கொண்டிருந்தார்.
10. அவன் அவனை விட்டு விடுவான்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 7

वसन्तसेनागमननिवेदनम्

विदूषकः—भो वयस्य, भणितं वसन्तसेनया—'भण चारुदत्तम्—अद्य प्रदोषे मयात्रागन्तव्यं' इति। तत्तर्कयामि रत्नावल्याऽपरितुष्टाऽपरं याचितुमागमिष्यतीति।

चारुदत्तः—वयस्य! आगच्छतु, परितुष्टा यास्यति।

चेटः—(प्रविश्य) अत्रेत मानवाः!

यथा यथा वर्षत्यभ्रखण्डं तथा तथा तिम्यति पृष्ठचर्म।
यथा यथा लगति शीतवातस्तथा तथा वेपते मे हृदयम्॥

वंशं वादयामि सप्तच्छिद्रं सुशब्दं
वीणां वादयामि सप्ततन्त्रीं नदन्तीम्।
गीतं गायामि गर्दभस्यानुरूपं
को मे गाने तुम्बुरुर्नारदो वा॥

आज्ञप्तोऽस्मि आर्यया वसन्तसेनया—'कुम्भीलक! गच्छ त्वम्। ममागमनं आर्यचारुदत्तस्य निवेदय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति। तत् यावत् आर्यचारुदत्तस्य गेहं गच्छामि एष चारुदत्तः वृक्षवाटिकायां तिष्ठति। एषोऽपि स दुष्टवटुकः तद् यावद् उपसर्पामि। कथं आच्छादितं द्वारं वृक्षवाटिकायाः। भवतु, एतस्य दुष्टवटुकस्य संज्ञां ददामि। (इति लोष्टगुटिकाः क्षिपति)

विदूषकः—अये! क इतानीं एषः प्राकार-वेष्टितमिव कपित्थं मां लोष्टकैस्ताडयति?

चारुदत्तः—आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पातितं भवेत।

विदूषकः—दास्याः पुत्र दुष्ट पारावत! तिष्ठ तिष्ठ यावदेतेन दण्डकाष्ठेन सुपक्वमिव चूतफलमस्माद् प्रासादाद् भूमौ पातयिष्यामि।

(इति दण्डकाष्ठमुद्यम्य धावति)

चारुदत्तः—(यज्ञोपवीतं आकृष्य) वयस्य! उपविश। किमनेन?। तिष्ठतु दयितासहितः तपस्वी पारावतः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चेटः—कथं पारावतं पश्यति, मां न पश्यति ? भवतु, अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि। (तथा करोति)

विदूषकः—(दिशोऽवलोक्य) कथं कुम्भीलकः ? तद्यावदुपसर्पामि। (उपसृत्य) अरे कुम्भीलक ! प्रविश; स्वागतं ते।

चेटः—(प्रविश्य) आर्य ! वन्दे।

विदूषकः—अरे, कुत्र त्वमीदृशे दुर्दिनेऽन्धकार आगतः ?।

चेटः—अरे, एषा सा।

विदूषकः—का एषा का।

चेटः—एषा सा।

विदूषकः—किमिदानीं दास्याःपुत्र ! दुर्भिक्षकाले वृद्धरङ्क इव ऊर्ध्वकं श्वासायसे—'एषा सा सा' इति ?।

चेटः—अरे, त्वमपीदानीं इन्द्रमहकामुक इव सुष्ठु किं काकायसे 'का का' इति ?।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विदूषकः—तत्कथय ।

चेटः—(स्वगतम्) भवतु, एवं भणिष्यामि । (प्रकाशम्) अरे, प्रश्नं ते दास्यामि ।

विदूषक.—अहं ते मस्तके पादं दास्यामि ।

चेटः—अरे, जानीहि तावत्; तेन हि कस्मिन् काले चूता मुकुलिता भवन्ति ?

विदूषकः—अरे दास्याःपुत्र ! ग्रीष्मे ।

चेटः—(सहासम्) अरे, नहि नहि ।

विदूषकः—(स्वगतम्) किमिदानीमत्र कथयिष्यामि ? (विचिन्त्य) भवतु, चारुदत्तं गत्वा प्रक्ष्यामि । (प्रकाशम्) अरे, मुहूर्तकं तिष्ठ । (चारुदत्तमुपसृत्य) भो वयस्य ! प्रक्ष्यामि तावत्, कस्मिन् काले चूता मुकुलिता भवन्ति ?

चारुदत्तः—मूर्ख ! वसन्ते ।

विदूषकः—(चेटमुपगम्य) मूर्ख ! वसन्ते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चेटः—द्वितीयं ते प्रश्नं दास्यामि। सुसमृद्धानां ग्रामाणां का रक्षां करोति ?

विदूषकः—अरे, रथ्या।

चेटः—(सहासम्) अरे, नहि नहि।

विदूषकः—भवतु, संशये पतितोऽस्मि। (विचिन्त्य) भवतु, चारुदत्तं पुनरपि प्रक्ष्यामि। (पुनर्निवृत्य चारुदत्तं तथैवोदाहरति)

चारुदत्तः—वयस्य! सेना।

विदूषकः—(चेटमुपगम्य) अरे दास्याः पुत्र! सेना।

चेटः—अरे, द्वे अप्येकस्मिन् कृत्वा शीघ्रं भण।

विदूषकः—सेनावसन्ते।

चेटः—ननु परिवर्त्य भण।

विदूषकः—(कायेन परिवृत्य) सेनावसन्ते।

चेटः—अरे, मूर्ख वटुक! पदे परिवर्तय।

विदूषकः—(पादौ परिवर्त्य) सेनावसन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चेटः—अरे मूर्ख ! अक्षरपदे पारवतय ।

विदूषकः—(विचिन्त्य) वसन्तसेना ।

चेटः—एषा साऽऽगता ।

विदूषकः—तद्यावच्चारुदत्तस्य निवेदयामि । (उपसृत्य) भो चारुदत्त ! धनिकस्त आगतः ।

चारुदत्तः—कुतोऽस्मत्कुले धनिकः ?

विदूषकः—यदि कुले नास्ति, तद्द्वारेऽस्ति ; एषा वसन्तसेनाऽऽगता ।

चारुदत्तः—वयस्य ! किं मां प्रतारयसि ?

विदूषकः—यदि मे वचने न प्रत्ययसे, तदिमं कुम्भीलकं पृच्छ । अरे दास्याः पुत्र कुम्भीलक ! उपसर्प ।

चेटः—(उपसृत्य) आर्य ! वन्दे ।

चारुदत्तः—भद्र ! स्वागतम् ; कथय सत्यं प्राप्ता वसन्तसेना ?

चेटः—एषा साऽऽगता वसन्तसेना ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चारुदत्तः—(सहर्षम्) भद्र! न कदाचित् प्रियवचनं निष्फलीकृतं मया, तत् गृह्यतां पारितोषिकम्। (इत्युत्तरीयं प्रयच्छति)

चेटः—(गृहीत्वा प्रणम्य सपरितोषम्) यावदार्यायै निवेदयामि। (इति निष्क्रान्तः) (मृच्छकटिकम्)

शब्दार्थाः

1. प्रदोषे = இரவில்.
2. तर्कयामि = ஊகிக்கிறேன், அனுமானிக்கிறேன்.
3. अवेत = அறியுங்கள்.
4. तिम्यति = ஈரமாகிறது, நனைந்துவிடுகிறது.
5. वेपते = நடுங்குகிறது.
6. दुष्टवटुकः கெட்டபையன்.
7. लोष्टगुटिकाः = மண்ணுங்கட்டிகள்.
8. कपित्थम् = விளாம் பழம்.
9. पारावतः = புறு.
10. दण्डकाष्ठम् = தடி.
11. वृद्धरङ्कः = வயது முதிர்ந்த பிச்சைக்காரன்.
12. ऊर्ध्वकम् = மேலே.
13. प्रक्ष्यामि = கேட்கப்போகிறேன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

14. मूहूर्तकम् = க்ஷணகாலம்.
15. उपसृत्य = நெருங்கி.
16. रथ्या = தெருவு (வீதி)
17. उदाहरति = சொல்கிறான்.
18. प्रतारयसि = ஏமாற்றுகிறாய்.
19. प्रत्ययसे = நம்பும்படி செய்கிறாய்.
20. निष्क्रान्तः = வெளியே சென்றான்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 8

ஆருவது கணத்தைச் சேர்ந்த தாதுக்கள்.

இதற்கு முன்பு முதற் கணம், பத்தாவது கணம் இவைகளைச் சேர்ந்த தாதுக்களைப் பற்றிச் சொல்லப்பட்டது. முதற்கணத்தைச் சேர்ந்த தாதுக்களுக்கும், பத்தாவது கணதாதுக்களுக்கும், தாதுவிற்கும் ப்ரயயத்திற்கும் நடுவில் முறையே 'अ' என்றும் 'अय' என்றும் வருகிறது. முதற்கணதாதுக்களைப் போலவே ஆருவது கணதாதுக்களுக்கும், தாதுவிற்கும், ப்ரத்யயத்திற்கும் நடுவில் 'अ' வருகிறது.

உதாஹரணம் :—

I முதற்கணம் —घुष् = (घुषिर् = अविशब्दने) (शब्दे)
घोषति, घोषतः, घोषन्ति।

II ஆருவது கணம்—नुद् = (णुद – प्रेरणे)
नुदति, नुदतः नुदन्ति।

घुष् தாது, ஆருவது கணத்தில் இருக்குமானால் அதன்ரூபம் 'घुषति' என்றுஆகும். 'नुद्' முதற் கணத்தில் இருக்குமானால் அதன் ரூபம் 'नोदति' என்று ஆகும்.

1. चल् = (चल = विलसने) அசைதல்.
चलति, चचाल, चलिता, चलिष्यति।

2. इष् = (इषु = इच्छायां) விரும்புதல்.
इच्छति, इयेष, एषिता, एष्टा, एषिष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. उज्झ् = (उज्झ=उत्सर्गे) விடுதல்.
उज्झति, उज्झांचकार, उज्झिता, उज्झिष्यति।

4. जुड् = (जुड = गतौ) செல்லுதல், அனுப்புதல்.
जुडति, जुजोड, जुडिता, जुडिष्यति।

5. तुट् = (तुट = कलहकर्मणि) கலகம் பண்ணுதல்.
तुटति, तुतोट, तुटिता, तुटिष्यति।

6. त्रुट् = (त्रुट = छेदने) வெட்டுதல்.
त्रुटति, तुत्रोट, त्रुटिता, त्रुटिष्यति।

7. धू = (धू = विधूनने) அசைதல்.
धुवति, दुधाव, धुविता, धुविष्यति।

8. प्रच्छ् = (प्रच्छ = ज्ञीप्सायाम्) கேட்பது.
पृच्छति, पप्रच्छ, प्रष्टा, प्रक्ष्यति।

9. मस्ज् = (टु मस्जो = शुद्धौ) அமிழ்த்து, முழுக்காடு முழுகுதல்.
मज्जति, ममज्ज, मंक्ता, मंक्ष्यति।

10. विश् = (विश = प्रवेशने) நுழைதல், பிரவேசித்தல்.
विशति, विवेश, वेष्टिता, वेक्ष्यति।

11. सृज् = (सृज = विसर्गे) சிருஷ்டித்தல், உண்டு பண்ணுதல்.
सृजति, ससर्ज, स्रष्टा, स्रक्ष्यति।

12. स्पृश् = (स्पृश = संस्पर्शने) ஸ்பரிசித்தல், தொடுதல்.
स्पृशति, पस्पर्श, स्प्रष्टा, स्प्रक्ष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

13. स्फुट् = स्फुट≈विकसने) மலருதல், விகஸித்தல்.
स्फुटति, पुस्फोट, स्फुटिता, स्फुटिष्यति ।

विश्= (विश = प्रवेशने) பிரவேசித்தல், நுழைதல்.
लट् - (वर्तमानकालः (நிகழ் காலம்)

एकवचनम् ஒருமை	द्विवचनम् இருமை	बहुवचनम् பன்மை	
विशति	विशतः	विशन्ति	ப்ரதம புருஷன்.
विशसि	विशथः	विशथ	மத்யம புருஷன்.
विशामि	विशावः	विशामः	உத்தம புருஷன்.

2. लिट्=(अनद्यतनपरोक्षभूतकालः) (இறந்த காலம்)

विवेश	विविशतुः	विविशुः	ப்ரதம புருஷன்
विवेशिथ	विविशथुः	विविश	மத்யம புருஷன்
विवेश	विविशिव	विविशिम	உத்தம புருஷன்

3. लुट्=(अनद्यतनभविष्यत्कालः) (எதிர்காலம்)

(चल = विलसने) அசைதல்

चलिता	चलितारौ	चलितारः	ப்ரதம புருஷன்
चलितासि	चलितास्थः	चलितास्थ	மத்யம புருஷன்
चलितास्मि	चलितास्वः	चलितास्मः	உத்தம புருஷன்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. लृट् = (भविष्यत्कालः) (எதிர்காலம்)

चलिष्यति	चलिष्यतः	चलिष्यन्ति	ப்ரதம புருஷன்
चलिष्यसि	चलिष्यथः	चलिष्यथ	மத்யம புருஷன்
चलिष्यामि	चलिष्यावः	चलिष्यामः	உத்தம புருஷன்

5. लोट् = (आज्ञार्थः) = (கட்டளை)

पृच्छ् = (प्रच्छं = ज्ञीप्सायां) கேட்டல்.

पृच्छतु पृच्छतात्	पृच्छताम्	पृच्छन्तु	ப்ரதம புருஷன்
पृच्छ पृच्छतात्	पृच्छतम्	पृच्छत	மத்யம புருஷன்
पृच्छानि	पृच्छाव	पृच्छाम	உத்தம புருஷன்

6 लङ् = (अनद्यतनभूतकालः) இறந்தகாலம்

अपृच्छत्	अपृच्छताम्	अपृच्छन्	ப்ரதமபுருஷன்
अपृच्छः	अपृच्छतम्	अपृच्छत	மத்யமபுருஷன்
अपृच्छम्	अपृच्छाव	अपृच्छाम	உத்தமபுருஷன்

7 लिङ् = (विध्यर्थः) விதி, தூண்டுதல்.

लिख् = (लिख = अक्षरविन्यासे) எழுதுதல்

लिखेत्	लिखेताम्	लिखेयुः	ப்ரதமபுருஷன்
लिखेः	लिखेतम्	लिखेत	மத்யமபுருஷன்
लिखेयम्	लिखेव	लिखेम	உத்தமபுருஷன்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8 लुङ् (भूतकालः) இறந்தகாலம்

विश् = (विश = प्रवेशने) பிரவேசித்தல், நுழைதல்.

अविक्षत्	अविक्षताम्	अविक्षन्	ப்ரதமபுருஷன்
अविक्षः	अविक्षतम्	अविक्षत	மத்யமபுருஷன்
अविक्षम्	अविक्षाव	अविक्षाम	உத்தமபுருஷன்

9 लृङ् = (हेतुहेतुमद्भावार्थः) காரணமிருந்தால் கார்யம் உண்டாகும், என்பதை விளக்குதல்.

अवेक्ष्यत्	अवेक्ष्यताम्	अवेक्ष्यन्	ப்ரதமபுருஷன்
अवेक्ष्यः	अवेक्ष्यतम्	अवेक्ष्यत	மத்யமபுருஷன்
अवेक्ष्यम्	अवेक्ष्याव	अवेक्ष्याम	உத்தமபுருஷன்

ஆருவது கணத்தைச் சேர்ந்த ஆத்மனேபத தாதுக்கள் :—

1. जुष् = (जुषी = प्रीतिसेवनयोः) பிரியப்படுதல்
   जुषते, जुजुषे, जोषिता, जोषिष्यते।
2. आद् = (दृङ् = आदरे) ஆதரித்தல்.
   आद्रियते, आदद्रे, आदर्ता, आदरिष्यते।
3. धृ = (धृङ् = अवस्थाने) தரித்தல்.
   ध्रियते, दध्रे, धर्ता, धरिष्यते।
4. लस्ज् = (ओ लस्जी = व्रीडायां) = வெட்கப்படுதல்.
   लज्जते, ललज्जे, लज्जिता, लज्जिष्यते।

உபயபத தாதுக்கள்.

1. कृष् = (कृष = विलेखने) உழுதல்.
   कृषति कृषते, चकर्ष चकृषे, कर्ष्टा कर्ष्टा, कर्क्ष्यति, कर्क्ष्यते कर्क्ष्यते, कर्क्ष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. क्षिप् = (क्षिप = प्रेरणे) அனுப்புதல், போடுதல்.
क्षिपति क्षिपते, चिक्षेप चिक्षिपे क्षेप्ता, क्षेप्स्यति, क्षेप्स्यते।

3. तुद् = (तुद = व्यथने) வ்யதை (கஷ்டப்படுதல்)
तुदति तुदते, तुतोद तुतुदे, तोत्ता, तोत्स्यति, तोत्स्यते।

4. दिश् = (दिश = अतिसर्जने) உத்தர விடுதல்.
दिशति दिशते, दिदेश दिदिशे, देष्टा, देक्ष्यति, देक्ष्यते।
नुद् = (णुद = प्रेरणे) ஏவுதல்.

5. नुदति नुदते, नुनोद नुनुदे, नोत्ता, नोत्स्यति, नोत्स्यते।

6. मिल् = (मिल = श्लेषणे) ஒன்று கூடுதல்.
मिलति, मिलते, मिमेल, मिमिले, मेलिता, मेलिष्यति मेलिष्यते।

7. मुच् = (मुच्लृ - मोक्षणे) விடுதலே யடைதல்.
मुञ्चति मुञ्चते, मुमोच मुमुचे, मोक्ता, मोक्ष्यति, मोक्ष्यते।

8. लिप् = (लिप = उपदेहे) பூசுதல்.
लिम्पति लिम्पते, लिलेप, लिलिपे, लेप्ता, लेप्स्यति, लेप्स्यते।

9. विद् = (विद्लृ = लाभे) அடைதல்.
विन्दति, विन्दते, विवेद, विविदे, वेत्ता, वेदिता, वेत्स्यति वेत्स्यते, वेदिष्यति वेदिष्यते।

10. सिच् = (षिच = क्षरणे) ஸேசனத்தல்.
सिञ्चति सिञ्चते, सिषेच, सिषिचे, सेक्ता, सेक्ष्यति, सेक्ष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 9

भगीरथवरप्रदानम्

भगीरथस्तु राजर्षिः धार्मिको रघुनन्दन ।
अनपत्यो महातेजाः प्रजाकामः स चाप्रजाः॥ १ ॥
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ।
स तपो दीर्घमातिष्ठद् गोकर्णे रघुनन्दन ॥ २ ॥
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ।
सुप्रीतो भगवान् ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ ३ ॥
ततः सुरगणैः सार्धं उपगम्य पितामहः ।
भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ ४ ॥
भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ।
तपसा च सुतप्तेन वरं वरय सुव्रत ॥ ५ ॥
तमुवाच महातेजाः सर्वलोकपितामहम् ।
भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः ॥ ६ ॥
यदि मे भगवान् प्रीतो यद्यस्ति तपसः फलम् ।
सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ ७ ॥
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वर्गं गच्छेयुरत्यन्तं सर्वे ते प्रपितामहाः ॥ ८ ॥
देया च सन्ततिर्देव नावसीदेत् कुलं च नः ।
इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ ९ ॥
उक्तवाक्यं च राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ १० ॥
मनोरथो महानेष भगीरथ महारथ ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ! ॥ ११ ॥
इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता ।
तां वै धारयितुं राजन् शिवो देवः प्रसाद्यताम् ॥ १२ ॥
गङ्गायाः पतनं वीर पृथिवी न सहिष्यते ।
तस्या धारयितारं च नान्यं पश्यामि शूलिनः ॥ १३ ॥
तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् ।
जगाम त्रिदिवं देवैः सर्वैः सह मरुद्गणैः ॥ १४ ॥

(महाभारतम्)

शब्दार्थाः

1. **अनपत्यः** = பிள்ளையில்லாதவன்.
2. **प्रजाकामः** = பிள்ளையை விரும்புகிறவன்.
3. **आधाय** = வைத்து, கொடுத்து.
4. **आप्नुयुः** = அடையட்டும், அடையவேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. अवसीदेत् = துக்கமடையட்டும், துக்கமடைவான்.
6. प्रसाद्यताम् = திருப்திப்படுத்தப்படட்டும்.
7. शूलिनः = சங்கரனைக் காட்டிலும், சங்கரனைத்தவிர.
8. त्रिदिवम् = ஸ்வர்க்கம்.
9. जगाम = சென்றார்.
10. सहिष्यते = பொறுப்பான்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 10

वृक्षः

वृक्षस्तरुर्द्रुमः शाखी पादपश्च वनस्पतिः।
विटपी च कुटः श्यालः महीरुडिति कथ्यते ॥

वृक्षाः भूमौ उद्भवन्ति। तेषां मूलानि पृथिव्यां सुदूरं ततानि भवन्ति। मूलानाम् उपरिष्टात् वृक्षस्य प्रकाण्डः भवति। प्रकाण्डात् शाखाः उद्भवन्ति। शाखाभ्यः प्रशाखाः सभवन्ति। तासु पत्राणि पुष्पाणि ततः, फलानि च संजायन्ते।

वृक्षाणां बहवः भेदाः भवन्ति। निम्बाम्र-वट-जम्बू-प्रयाल-पनस-नारिकेल - खर्जूर-तालक - बिल्व-भल्लातक-खदिर-बदर-बब्बूलादयः फलवृक्षाः भवन्ति। अन्ये च कुन्द-कदम्ब-कुरबकाशोक-शिरीष-कुटज-नाग-पुंनाग-मन्दार-पारिजात-पाटल-चम्पक - किंशुक-तमाल - बकुलादयः पुष्पवृक्षाः कथ्यन्ते।

पुनश्च वृक्षाणां द्वौ भेदौ भवतः। तज-आम्र-जम्बू-प्रयाल-पनस-नारिकेल-जम्बीर-ताल- बिल्व -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कपित्थादयः उद्यानवृक्षाः सन्ति। एते उद्यानेषु सुरक्षिताः सिञ्चिताश्च पुष्यन्ति पुष्प्यन्ति फलन्ति च।

अन्ये च कुन्द-मन्दार-पारिजात-पाटलाशोक-चम्पक-चन्दनादयः अपि उद्यानेषु एव भवन्ति, प्रसुवते च केवलं सुगन्धपुष्पाणि। अन्ये तु निम्ब-बब्बूल-कुटज-किंशुक-कंकोल-खदिर-बदर-भल्लातकादयः वृक्षाः आरण्याः कथ्यन्ते। तेषां फलानि स्वादूनि न भवन्ति।

वृक्षा अपि मनुष्या इव पीत्वा जीवन्ति। मूलानि वृक्षाणां पादाः भवन्ति। ते पादैः पिबन्ति, अत एव पादपाः कथ्यन्ते। तेषां मूलानि भूमेः रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति तेन ते प्रवर्धन्ते, पुष्यन्ति, फुल्लन्ति, दधति च फलानि। वृक्षान् अपि वर्ष-वात-शीतातपाः बाधन्ते। तेऽपि सुखानि दुःखानि च अनुभवन्ति। तेषु अपि प्राणाः भवन्ति, अत एव ते प्राणिनः इव जायन्ते, फुल्लन्ति, फलन्ति, म्रियन्ते च। ते कदापि खग-मृग-नर-वानरा इव न चरन्ति इति अचराः कथ्यन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहूपकुर्वन्ति वृक्षाः प्राणिनाम्। ते हि अशरणानां शरणम्। बुभुक्षितानां भोजनम्। संतप्तानां समाश्रयाः। श्रान्तानां विश्राम-गृहाणि। सुखिनां सौख्योपकरणानि। अच्छत्रिणां छत्रम्। निरालम्बमां आलम्बनम्। सुहृदश्च जगतः।

नराः वानराः खगाः मृगा घुणाश्चापि तेषां पत्राणि, पुष्पाणि, फलानि, मूलानि, वल्कलानि, काष्ठानि च खादन्ति। वृक्षा हि पत्रैः पुष्पैः फलैः छायाभिः मूलैः वल्कलैः दारुभिश्च स्वसंपद्भिः सदैव अभ्यागतानां जीवानां सत्कारं कुर्वन्तीत्यलं प्रशंसायै तेषाम्। इदमत्रोच्यते—

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
धन्या महीरुहो येभ्यो निराशा यान्ति नार्थिनः॥

(बालसंस्कृतम्)

शब्दार्थाः

1. उद्भवन्ति = உண்டாகின்றன.
2. ततानि = பரவியவைகளாக (வேர்கள்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. प्रकाण्डः = அடிமரம்.
4. निम्बः = வேப்பமரம் (வேம்பு)
5. प्रायाशः = பாதாம் பழம போன்ற பழத்தை உடைய தோட்டத்து மரத்தின் பெயர்.
6. भल्लातकः = காட்டில் வளரும் ஒரு மரத்தின் பெயர்.
7. पुष्यन्ति = வளருகின்றன.
8. पुष्प्यन्ति = பூக்கின்றன.
9. फलन्ति = பயனுள்ளதாக ஆகின்றன (பழங்களைக் கொடுக்கின்றன)
10. बुभुक्षितानाम् = பசியுள்ளவர்களுக்கு.
11. श्रान्तानाम् = களைப்புற்றவர்களுக்கு.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center -

பாடம்—11

நான்காவது கணத்தைச் சேர்ந்த பரஸ்மைபத தாதுக்கள்:—

1. क्षम् = (क्षमू=सहने) =பொறுத்துக் கொள்ளல்.
क्षाम्यति, चक्षाम, क्षमिता, क्षन्ता, क्षमिष्यति।

2. क्षिप् = (क्षिप=प्रेरणे) = அனுப்புதல், ஏவுதல்.
क्षिप्यति, चिक्षेप, क्षेप्ता, क्षेप्स्यति।

3. क्षुभ् = (क्षुभ=सञ्चलने) அசைதல், கலக்குதல்.
क्षुभ्यति, चुक्षोभ, क्षोभिता, क्षोभिष्यति।

4. गुप् = (गुप=व्याकुलत्वे) = மனம் குழம்புதல்.
गुप्यति, जुगोप, गोपिता, गोपिष्यति।

5. तुष् = (तुष=प्रीतौ) = மகிழ்ந்தாடப்படுதல், திருப்திப் படுதல்.
तुष्यति, तुतोष, तोष्टा, तोक्ष्यति।

6. क्रुध् = (क्रुध=कोपे) = கோபித்துக் கொள்ளுதல்.
क्रुध्यति, चुक्रोध, क्रोद्धा, क्रोत्स्यति।

7. कुप् = (कुप=क्रोधे) = கோபித்துக்கொளுதல்.
कुप्यति, चुकोप, कोपिता, कोपिष्यति।

8. अस् = (असु = क्षेपणे) = வீசி எறிதல்.
अस्यति, आस, असिता, असिष्यति।

9. तृप् = (तृप = प्रीणने) = திருப்திபடுதல்.
तृप्यति, ततर्प, तर्पिता, तर्प्ता, तर्प्स्यति।

10. तृष् = (अि तृषा = पिपासायां) = தாகத்தினல் வருந்துதல்.
तृष्यति, ततर्ष, तर्षिता, तर्षिष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रुध् = கோபித்தல்
(क्रुध = कोपे)

I. लट् = (वर्तमानकालः)
நிகழ் காலம்

क्रुध्यति	क्रुध्यतः	क्रुध्यन्ति	ப்ரதம புருஷன்.
क्रुध्यसि	क्रुध्यथः	क्रुध्यथ	மத்யம புருஷன்.
क्रुध्यामि	क्रुध्यावः	क्रुध्यामः	உத்தம புருஷன்.

II. लिट् = (अनद्यतनपरोक्षभूतकालः)
இறந்த காலம்

चुक्रोध	चुक्रुधतुः	चुक्रुधुः	ப்ரதம புருஷன்.
चुक्रोधिथ	चुक्रुधथुः	चुक्रुध	மத்யம புருஷன்.
चुक्रोध	चुक्रुधिव	चुक्रुधिम	உத்தம புருஷன்.

III. लुट् = (अनद्यतनभविष्यत्कालः)
எதிர்காலம்

क्रोद्धा	क्रोद्धारौ	क्रोद्धारः	ப்ரதமபுருஷன்.
क्रोद्धासि	क्रोद्धास्थः	क्रोद्धास्थ	மத்யமபுருஷன்.
क्रोद्धास्मि	क्रोद्धास्वः	क्रोद्धास्मः	உத்தமபுருஷன்.

IV. लृट् = (सामान्यभविष्यत्कालः)
எதிர்காலம்

क्रोधिष्यति	क्रोधिष्यतः	क्रोधिष्यन्ति	ப்ரதம புருஷன்.
क्रोधिष्यसि	क्राधिष्यथः	क्रोधिष्यथ	மத்யம புருஷன்.
क्रोधिष्यामि	क्रोधिष्यावः	क्रोधिष्यामः	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

V. लोट् = (अज्ञार्थः) கட்டளை.

क्रुध्यतु क्रुध्यतात्	क्रुध्यताम्	क्रुध्यन्तु	ப்ரதம புருஷன்.
क्रुध्य क्रुध्यतात्	क्रुध्यतम्	क्रुध्यत	மத்யம புருஷன்.
क्रुध्यानि	क्रुध्याव	क्रुध्याम	உத்தம புருஷன்.

VI. लङ् = (अनद्यतनभूतकालः)

இறந்தகாலம்

अक्रुध्यत्	अक्रुध्यताम्	अक्रुध्यन्	ப்ரதம புருஷன்.
अक्रुध्यः	अक्रुध्यतम्	अक्रुध्यत	மத்யம புருஷன்.
अक्रुध्यम्	अक्रुध्याव	अक्रुध्याम	உத்தம புருஷன்

VII. लिङ् = (विधिलिङ्) ஏவுதல்

क्रुध्येत्	क्रुध्येताम्	क्रुध्येयुः	ப்ரதம புருஷன்.
क्रुध्येः	क्रुध्येतम्	क्रुध्येत	மத்யம புருஷன்.
क्रुध्येयम्	क्रुध्येव	क्रुध्येम	உத்தம புருஷன்.

(आशीर्लिङ्)

क्रुध्यात्	क्रुध्यास्ताम्	क्रुध्यासुः	ப்ரதம புருஷன்.
क्रुध्याः	क्रुध्यास्तम्	क्रुध्यास्त	மத்யம புருஷன்.
क्रुध्यासम्	क्रुध्यास्व	क्रुध्यास्म	உத்தம புருஷன்.

VIII. लुङ् (भूतकालः)

இறந்தகாலம்

अक्रुधत्	अक्रुधतां	अक्रुधन्	ப்ரதம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अक्रुधः	अक्रुधतं	अक्रुधत	மத்யம புருஷன்.
अक्रुधं	अक्रुधाव	अक्रुधाम	உத்தம புருஷன்

IX. लृङ् = (हेतुहेतुमद्भावार्थः)

'காரணமிருந்தால் கார்யம் ஏற்படும்' எனபதை விளக்குவது.

अक्रोधिष्यत्	अक्रोधिष्यताम्	अक्रोधिष्यन्	ப்ரதம புருஷன்
अक्रोधिष्यः	अक्रोधिष्यतं	अक्रोधिष्यत	மத்தியம புருஷன்
अक्रोधिष्यं	अक्रोधिष्याव	अक्रोधिष्याम	உத்தம புருஷன்

எவ்விதம் முதற் கணத்தைச் சேர்ந்த தாதுக்களுக்கு 'श' என்றும், பத்தாவது கணத்தைச் சேர்ந்த தாதுக்களுக்கு 'अय' என்றும், ஆருவது கண்த்தைச் சேர்ந்த தாதுக்களுக்கு 'अ' என்றும் வருகிறதோ, அதைப் போலவே மேலே கூறப்பட்ட நான்காவது கணத்தைச் சேர்ந்த தாதுக்களுக்கு, தாதுவிற்கும் ப்ரத்யயத்திற்கு மிடையில் 'य' என்று வருகிறது.

உதாரணம் :—

1. முதற் கணம் :— खाद् + अ + ति = खादति।
2. பத்தாவது கணம் :— कथ् + अय + ति = कथयति।
3. ஆருவ்து கணம் :— नुद् + अ + ति = नुदति।
4. நான்காவது கணம் :— क्रुप् + य + ति = क्रुप्यति।

இங்கேகொடுக்கப்பட்டுள்ள, अ, अय, अ, य, என்ற தாதுவிற்கும் ப்ரத்யயத்திற்கும் நடுவில் சேர்க்கும் எழுத்துக்கள் 'விகரண' ப்ரத்யயங்கள் என்று கூறப்படுகின்றன. இவைகளை ஆதாரமாகக்கொண்டு மற்ற கணங்களைப் பற்றி அறிந்து கொள்ளலாம்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 12.

त्रिजटास्वप्नवर्णनम्

ततः सीतामुपागम्य राक्षस्यो भीमदर्शनाः ।
पुनः परुषमेकार्थमनर्थार्थमथाऽब्रुवन् ॥ १ ॥

अद्येदानीं तवानार्ये सीते पापविनिश्चये ।
राक्षस्यो भक्षयिष्यामो मांसमेतद्यथासुखम् ॥ २ ॥

सीतां ताभिरनार्याभिर्दृष्ट्वा सन्तर्जितां तदा ।
राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत् ॥ ३ ॥

आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ।
जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ४ ॥

स्वप्नोह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भर्तुरस्या जयाय च ॥ ५ ॥

गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ।
युक्तां हंससहस्रेण स्वयमास्थाय राघवः ॥ ६ ॥

शुक्लमाल्याम्बरधरो लक्ष्मणेन सहागतः ।
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सागरेण परिक्षिप्तं श्वेतं पर्वतमास्थिता ।
रामेण संगता सीता भास्करेण प्रभा यथा ॥ ८ ॥
राघवश्च पुनर्हृष्टश्चतुर्दन्तं महागजम् ।
आरूढः शैलसंकाशं चचार सह लक्ष्मणः ॥ ९ ॥
ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ।
शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १० ॥
इहोपयातः काकुत्स्थः सीतया सह भार्यया ।
लक्ष्मणेन सह भ्रात्रा विमाने पुष्पके स्थितः ॥ ११ ॥
नहि रामो महातेजाः शक्यो जेतुं सुरासुरैः ।
राक्षसैर्वापि सर्वैर्वा स्वर्गः पापजनैरिव ॥ १२ ॥
रावणश्च मया दृष्टो मुण्डस्तैलसमुक्षितः ।
रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥ १३ ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ।
मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥ १४ ॥
प्रस्थितो दक्षिणामाशां प्रविष्टोऽकर्दमं ह्रदम् ।
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥ १५ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा ।
सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ १६ ॥
अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ।
राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ १७ ॥

(सुन्दरकाण्डम्)

शब्दार्थाः

1. परुषम् = கொடூரமான.
2. सन्तर्जिताम् = மிரட்டப்பட்டவளே. (ஸீதையை)
3. रोमहर्षणः = மயிர்கூச்சலே உண்டுபண்ணுகின்ற.
4. शिबिकाम् = பல்லகை.
5. उपयातः = சென்றவன் (ராமன்)
6. समुक्षितः = பூசப்பட்டவன்.
7. करवीरः = அறளி.
8. आशु = சீக்கிரம்.
9. आशाम् = திசையை.
10. कर्दमम् = சகதி, சேறு.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 13

நான்காவது கணத்தைச் சேர்ந்த பரஸ்மைபதி தாதுக்கள்.

(தொடர்ச்சி)

1. दप् = (दप = हर्षमोहनयोः) கர்வம் கொள்ளுதல்.
दप्यति, ददर्प, दर्पिता, दर्पिष्यति।

2. द्रुह् = (द्रुह = जिघांसायां) த்ரோஹம் பண்ணுதல்.
द्रुह्यति, दुद्रोह, द्रोहिता, द्रोग्धा, द्रोढा, द्रोहिष्यति, द्रोक्ष्यति।

3. नश् = (णश = अदर्शने) அழிவுறல், நாசம் அடைதல்.
नश्यति, ननाश, नशिता, नंष्टा, नशिष्यति, नङ्क्ष्यति।

4. नृत् = (नृती गात्रविक्षेपे) = நர்த்தனம் செய்தல்.
नृत्यति, ननर्त, नर्तिता, नर्तिष्यति नर्त्स्यति।

5. पुष् = (पुष = पुष्टौ) வளருதல்.
पुष्यति, पुपोष, पोष्टा, पोक्ष्यति।

6. भ्रम् = (भ्रमु = अनवस्थाने) சுற்றித்திரிதல், அலைதல்.
भ्राम्यति, बभ्राम, भ्रमिता, भ्रमिष्यति।

7. भ्रंश् = (भ्रंशु = अधः पतने) கீழே விழுதல்.
भ्रश्यति, बभ्रंश, भ्रंशिता, भ्रंशिष्यति।

8. मुह् = (मुह = वैचित्ये) விவேக மில்லாமை, தெளிவில்லாமை.
मुह्यति, मुमोह, मोहिता, मोग्धा, मोढा, मोहिष्यति मोक्ष्यति।

9. मृष् = (मृष = तितिक्षायां) பொறுமை கொள்ளல்.
मृष्यति, ममर्ष, मर्षिता, मर्षिष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लुभ् = (लुभ = गार्ध्ये) விரும்புதல், ஆசை,
लुभ्यति, लुलोभ, लोभिता, लोभ्धा लोभिष्यति।

11. व्रीड् = (व्रीड = चोदने लज्जायां च) வெட்கப்படுதல்.
व्रीड्यति, विव्रीड, व्रीडिता, व्रीडिष्यति।

12. श्रम् = (श्रमु = तपसि खेदे च) சிரமப்படுதல்.
श्राम्यति, शश्राम, श्रमिता, श्रमिष्यति।

13. ष्ठीव् = (ष्ठिवु = निरसने) எச்சில் துப்புதல், கக்குதல்.
ष्ठीव्यति, तिष्ठेव, ष्ठेविता, ष्ठेविष्यति।

14. सिव् = (षिवु = तुन्तुसन्ताने) தைத்தல், இணைத்தல்.
सीव्यति, सिषेव, सेविता, सेविष्यति।

15. हृष् = (हृष = तुष्टौ) மகிழ்தல், சந்தோஷித்தல்.
हृष्यति, जहर्ष, हर्षिता, हर्षिष्यति।

நான்காவது கணத்தைச் சேர்ந்த ஆத்மனேபத தாதுக்கள்.

1. खिद् = (खिद = दैन्ये) வருத்தப்படுதல்.
खिद्यते, चिखिदे, खेत्ता, खेत्स्यते।

2. जन् = (जनी = प्रादुर्भावे) பிறப்பது, உண்டாகுதல்.
जायते, जज्ञे, जनिता, जनिष्यते।

3. डी = (डीङ = विहायसा गतौ) பறப்பது.
डयते डिड्ये, डयिता, डयिष्यते।

4. दीप् = (दीपी = दीप्तौ) ப்ரகாசித்தல், விளங்குதல்.
दीप्यते, दिदीपे, दीपिता, दीपिष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. पी = (पीङ्=पाने) குடித்தல்.
पीयते, पिप्ये, पेता, पेष्यते।

6. पूर् = (पूरी=आप्यायने) பூரணமாக்குதல், நிரப்புதல்.
पूर्यते, पुपूरे, पूरिता, पूरिष्यते।

7. प्री = (प्रीङ्=प्रीतौ) ப்ரியமாக இருத்தல்.
प्रीयते, पिप्रिये, प्रेता, प्रेष्यते।

8. बुध् = (बुध=अवगमने) அறிந்து கொள்ளல்.
बुध्यते, बुबुधे, बोद्धा, भोत्स्यते।

9. युध्=(युध=संप्रहारे)போர்புரிதல், யுத்தம் செய்தல்.
युध्यते, युयुधे, योद्धा, योत्स्यते।

10. विद् = (विद = सत्तायां) இருப்பது.
विद्यते, विविदे, वेत्ता, वेत्स्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 14.

प्रथमः परिचयः शकुन्तलादुष्यन्तयोः

राजा—(सत्वरमुपसृत्य)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु ॥

(सर्वा राजानं दृष्ट्वा किंचिदिव संभ्रान्ताः)

अनसूया—आर्य, न खलु किमप्यत्याहितम् । इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता ।

राजा—(शकुन्तलाभिमुखो भूत्वा) अपि नाम तपो वर्धते ?

(शकुन्तला साध्वसाद् अवचना तिष्ठति)

अनसूया—इदानीमतिथिविशेषलाभेन । हला शकुन्तले ! गच्छोटजम् । फलमिश्रमर्घ्यमुपहर । इदं पादोदकं भविष्यति ।

राजा—भवतु, भवतीनां सूनृतयैव गिरा कृतमातिथ्यम् ।

प्रियंवदा—तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अनसूया—हला शकुन्तले ! उंचितं नः पर्युपासनमतिथीनाम् । अत्रोपविशामः । (सर्वा उपविशन्ति)

शकुन्तला—(आत्मगतम्) किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ।

राजा—(सर्वा विलोक्य) अहो ! समवयोरूपरमणीयं भवतीनां सौहार्दम् ।

प्रियंवदा—(जनान्तिकम्) अनुसूये ! को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन् प्रभाववानिव लक्ष्यते ।

अनसूया—(जनान्तिकम्) सखि ! ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । (प्रकाशम्) आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते कतम आर्येण राजर्षिवंशोऽलंक्रियते, कतमो वा विरहपर्युत्सुकजनः कृतो देशः, किं निमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।

शकुन्तला—(आत्मगतम्) हृदय, मा उत्तास्य । एतत् तया चिन्तितमनुसूया मन्त्रयते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—(आत्मगतम्) कथमिदानीमात्मानं निवेदयामि ? कथं वात्मापहारं करोमि ? भवतु, एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति, यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः।

अनसूया—सनाथा इदानीं धर्मचारिणः।

(शकुन्तला शृङ्गारलज्जां रूपयति।)

सख्यौ—(उभयोराकारं विदित्वा जनान्तिकम्।) हला शकुन्तले ! यद्यत्राद्य तातः संनिहितो भवेत्।

शकुन्तला—ततः किं भवेत् ?

सख्यौ—इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति।

शकुन्तला—युवामपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे। न युवयोर्वचनं श्रोष्यामि।

राजा—वयमपि तावद् भवत्योः सखीगतं किमपि पृच्छामः।

सख्यौ—आर्य ! अनुग्रह इवेयमभ्यर्थना।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—भगवान् काश्यपः शाश्वते ब्रह्मणि स्थितः इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत्।

अनसूया—शृणोत्वार्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।

राजा—अस्ति, श्रूयते।

अनसूया—तमावयोः प्रियसख्याः प्रभवमवगच्छ। उज्झितायाः शरीरसंवर्धनादिभिः तातकाश्यपोऽस्याः पिता।

राजा—उज्झितशब्देन जनितं मे कौतूहलम्। आमूलाच्छ्रोतुमिच्छामि।

अनसूया—शृणोत्वार्यः। पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशंकैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी।

राजा—अस्त्येतदन्यसमाधिभीरूत्वं देवानाम्।

अनसूया—ततो वसन्तोदारसमयं तस्या उन्मादयितृ रूपं प्रेक्ष्य—(अर्धोक्ते लज्जया विरमति।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—परस्ताज्ज्ञायते एव । सर्वथाप्सरः-संभवैषा ।

अनसूया—अथ किम् ।

राजा—उपपद्यते ।

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥

(शकुन्तलाधोमुखी तिष्ठति)

(अभिज्ञानशाकुन्तलम्)

1. वसुमतीम् = பூமியை.
2. शासितरि = (शासिता = ஆட்சி புரிபவன்) (तस्मिन्) (அரசனிடத்தில், என்பது பொருள்)
3. मुग्धा = கள்ளம் கபடமற்றவள்.
4. अभिभूयमाना = துன்புறுத்தப் பட்டவள்.
5. साध्वसादवचना = பயத்தினால் பேசாதவள். (साध्वसाद् + अवचना).
6. अत्याहितम् = கெடுதல்.
7. विश्रम्भः = விச்வாஸம், நம்பிக்கை.
8. मा उत्ताम्य = கலங்காதே.
9. उपपद्यते = பொருத்தம்தான், சரியானதே.
10. उदेति = உண்டாகிறது. (முளைக்கிறது)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 15

இரண்டாவது கணதாதுக்கள்.

முதற் கணதாதுக்களைப் போலவே இரண்டாவது கணதாதுக்களுக்கும், தாதுவிற்கும் ப்ரத்யயத்திற்கும் நடுவில் 'ஞ' என்ற விகரணப்ரத்யயம் வருகிறது. ஆனால் இலக்கணப்படி இரண்டாவது கணதாதுக்களின் 'ஞ' என்ற விகரணப்ரத்யயம் மறைந்து விடுவதால் இக்கணதாதுக்களின் 'ஞ' என்ற ப்ரத்யயம் கரியாரூபங்களில் தென்படுவதில்லை.

உதாஹரணம் :—

1. दा = (दाप् = लवने) (அறுத்தல்) दा + ति = दाति।
அறுக்கிறான்.

2. पा = (पा = रक्षणे) (காத்தல்) पा + ति = पाति।
காப்பாற்றுகிறான்.

3. भा = (भा = दीप्तौ) (ப்ரகாசித்தல்) भा + ति = भाति।
ப்ரகாசிக்கிறான், விளங்குகிறான்.

இரண்டாவது கணத்தைச் சேர்ந்த பரஸ்மைபததாதுக்கள்.

1. वच् = (वच = परिभाषणे) சொல்லுதல்.
वक्ति, उवाच, वक्ता, वक्ष्यति।

2. ला = (ला = आदाने) எடுத்துக் கொள்ளல்.
लाति, ललौ, लाता, लास्यति।

3. मा = (मा-माने) அளத்தல்.
माति, ममौ, माता, मास्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. भा = (भा-दीप्तौ) பிரகாசித்தல், விளங்குதல்.
भाति, बभौ, भाता, भास्यति।

5. या = (या = प्रापणे) செல்லுதல்.
याति, ययौ, याता, यास्यति।

6. पा = (पा = रक्षणे) காப்பாற்றுதல்.
पाति, पपौ, पाता, पास्यति।

7. दा = (दाप् = लवने) அறுத்தல், வெட்டுதல்.
दाति, ददौ, दाता, दास्यति।

8. जागृ = (जागृ = निद्राक्षये) விழித்துக்கொள்ளுதல், கவனமாக இருத்தல்
जागर्ति, जजागार, जागरिता, जागरिष्यति।

9. अस् = (अस = भुवि) இருப்பது.
अस्ति, आसीत्, भविता, भविष्यति।

10. अद् = (अद = भक्षणे) சாப்பிடுதல்.
अत्ति, जघास आद, अत्ता, अत्स्यति।

11. वश् = (वश = कान्तौ) விருப்பம்.
वष्टि, उवाश, वशिता, वशिष्यति।

12. विद् = (विद = ज्ञाने) அறிந்துகொள்ளுதல்.
वेत्ति, विवेद, वेदिता, वेदिष्यति।

13. शास् = (शासु = अनुशिष्टौ) கட்டளையிடுதல், ஆட்சி புரிதல்.
शास्ति, शशास, शासिता, शासिष्यति।

14. स्ना = (ष्णा = शौचे) ஸ்நானம் செய்தல், சுத்தம் செய்தல்.
स्नाति, स्नौ, स्नाता, स्नास्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

15. स्वप् = (ञिष्वप्=शये) தூங்குதல்.
स्वपिति, सुष्वाप, स्वप्ता, स्वप्स्यति।

இரண்டாவது கணத்தைச்சேர்ந்த ஆத்மனேபத
தாதுக்கள்.

1. सू = (षूङ्=प्राणिगर्भविमोचने) கர்ப்பத்திலிருந்து
வெளிவருதல், ஈன்றெடுத்தல்
सूते, सुषुवे, सोता, सविता, सोष्यते, असविष्ट।

2. शी=(शीङ्=स्वप्ने) படுத்துக் கொள்ளுதல்.
शेते, शिश्ये, शयिता शेष्यते

3. आशास्=(आङ्: शासु=इच्छायां) ஆசீர்வாதம் செய்தல்.
आशास्ते, आशशासे, आशासिता, आशासिष्यते।

4. ईश्=(ईश=ऐश्वर्ये) சாமர்த்தியமுள்ள வனாகிறான்.
ईष्टे, ईशांचक्रे, ईशिता, ईशिष्यते।

மேலே சொல்லப்பட்ட தாதுக்களுடைய உதவியைக்
கொண்டு ஸம்ஸ்கிருதத்தில் வாக்கியங்களை அமையுங்கள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 16

वर्षासमयः

रामो लक्ष्मणं वदति :—

अयं स कालः सम्प्राप्तः समयोऽद्य जलागमः ।
सम्पश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः ॥ १ ॥

रजः प्रशान्तं सहिमोऽद्य वायु-
निंदाघदोषप्रसराः प्रशान्ताः ।
स्थिता हि यात्रा वसुधाधिपानां
प्रवासिनो यान्ति नराः स्वदेशान् ॥ २ ॥

क्वचित्प्रकाशं क्वचिदप्रकाशं
नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसंनिरुद्धं
रूपं यथा शान्तमहार्णवस्य ॥ ३ ॥

समुद्वहन्तः सलिलातिभारं
बलाकिनो वारिधरा नदन्तः ।
महत्सु शृङ्गेषु महीधराणां
विश्रम्य विश्रम्य पुनः प्रयान्ति ॥ ४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रहर्षिताः केतकपुष्पगन्ध-
माघ्राय हृष्टा वननिर्झरेषुं ।
प्रपातशब्दाकुलिता गजेन्द्राः
सार्धं मयूरैः समदा नदन्ति ॥ ५ ॥

धारानिपातैरभिहन्यमानाः
कदम्बशाखासु विलम्बमानाः ।
क्षणार्जितं पुष्परसावगाढं
शनैर्मदं षट्चरणास्त्यजन्ति ॥ ६ ॥

मुक्तासकाशं सलिलं पतद्भै
सुनिर्मलं पत्रपुटेषु लब्धम् ।
हृष्टा विवर्णच्छदना विहङ्गाः
सुरेन्द्रदत्तं तृषिताः पिबन्ति ॥ ७ ॥

मत्ता गजेन्द्रा मुदिता गवेन्द्रा
वनेषु विश्रान्ततरा मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥ ८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्णघोषाः ।
प्रनष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो जलैर्विप्रतिपन्नमार्गाः ॥ ९ ॥

नरैर्नरेन्द्रा इव पर्वतेन्द्राः
सुरेन्द्रदत्तैः पवनोपनीतैः ।
घनाम्बुकुम्भैर्धरणी विसृप्ता
तमोविलिप्ता न दिशः प्रकाशाः ॥ १० ॥

महान्ति कूटानि महीधराणां
धाराभिघौतान्यधिकं विभान्ति ।
महाप्रमाणैर्विपुलैः प्रपातै-
र्मुक्ताकलापैरिव लम्बमानैः ॥ ११ ॥

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः ॥ १२ ॥

(रामायणम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शब्दार्थाः

1. गिरिसन्निभैः = மலைகளுக்கு நிகரானவைகளால்.
2. विभाति = விளங்குகிறது, பிரகாசிக்கிறது.
3. अर्णवस्य = சமுத்திரத்தினுடைய.
4. समुद्वहन्तः = தாங்குகின்ற, வஹிக்கின்றவைகள்.
5. नदन्तः = கர்ஜிப்பவைகளான. (சப்தம் செய்பவைகள்)
6. षट्चरणाः = வண்டுகள்.
7. धौतानि = வெண்ணிறமானவைகளாக.
8. विभान्ति = விளங்குகின்றன.
9. प्लवङ्गाः = வானரங்கள், (குரங்குகள்)
10. शिखिनः = மயில்கள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 17

उर्वशीपुरूरवसोः सुतसङ्गमः

राजा—(तापसीकुमारौ दृष्ट्वा) अम्ब, अभिवादये।

तापसी—महाभाग, सोमवंशविस्तारयिता भव। (आत्मगतम्) अनाख्यातोऽपि विज्ञात एतस्य राजर्षेरौरसः सम्बन्धः। (प्रकाशम्) जात, प्रणम ते गुरुम्।

कुमारः—(चापगर्भमञ्जलिं करोति)

राजा—आयुष्मान् भव।

कुमारः—(आत्मगतम्)

यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति।
उत्सङ्गवर्धितानां गुरुषु भवेत् कीदृशः स्नेहः॥

राजा—भगवति किमागमनप्रयोजनम्।

तापसी—शृणोतु महाराजः। एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्। गृहीतविद्यो धनुर्वेदेऽभिविनीतः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—सनाथः खलु संवृत्तः ।

तापसी—अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम् ।

विदूषक—(सावेगम्) किमिव ।

तापसी—गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानोऽनेन लक्ष्यीकृतो बाणस्य ।

विदूषक—(राजानमवलोक्य)

राजा—ततस्ततः ।

तापसी—तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा-'निर्यातय ! हस्तन्यास, मिति। तदिच्छामि देवीमुर्वशीं प्रेक्षितुम् ।

राजा—तेन हि आसनमनुगृह्णातु भगवती ।

तापसी—(उपनीतआसन उपविशति)

राजा—लातव्य ! आहूयतामुर्वशी ।

कञ्चुकी—यथाज्ञापयति देवः । (इति निष्क्रान्तः)

राजा—(कुमारमवलोक्य) एहयेहि वत्स !

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ॥

तापसी—जात ! आनन्दय पितरम् ।

कुमार—(राजानमुपगम्य पादग्रहणं करोति)

राजा—(कुमारं परिष्वज्य पादपीठे चोपवेश्य) वत्स ! इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदूषक—किमिति शङ्किष्यते । आश्रमवास-परिचित एव शाखामृगः ।

कुमार—(सस्मितम्) तात ! वन्दे ।

विदूषक—स्वस्ति भवते ।

(ततः प्रविशत्युर्वशी कञ्चुकी च)

कुञ्चुकी—इत इतो देवी ।

उर्वशी—(कुमारमवलोक्य) को नु खल्वेष सबाणा-सनः पादपीठे स्वयं महाराजे संयम्यमानशिखण्ड-कस्तिष्ठति । (तापसीं दृष्ट्वा) अहो ! सत्यवतीसूचितो मम पुत्रक आयुः । महान् खलु संवृत्तः । (परिक्रामति)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—(उर्वशीं दृष्ट्वा) इयं प्राप्ता ते त्वदालोकनतत्परा जननी ।

तापसी—जात ! एहि, प्रत्युद्गच्छ मातरम् ।

कुमारः—(उर्वशीं प्रत्युद्गच्छति)

उर्वशी—अम्ब ! पादप्रणामं करोमि ।

तापसी—वत्से ! भर्तुर्बहुमता भव ।

कुमारः—अम्ब ! अभिवादये ।

उर्वशी—(कुमारमुन्नमितमुखं परिष्वज्य) वत्स ! पितरमाराधयिता भव । (राजानमुपेत्य) जयतु जयतु महाराजः ।

राजा—स्वागतं पुत्रवत्यै । इत आस्यताम् । (अर्धासनं ददाति)

उर्वशी—(उपविशति)

(सर्वे यथोचितमुपविशन्ति)

तापसी—एष गृहीतविद्य आयुः साम्प्रतं कवचधरः संवृत्तः । तदेतस्य ते भर्तुः समक्ष निर्यातितो हस्तनिक्षेपः । तद्विसर्जयितुमिच्छामि । उपरुध्यते ममाश्रमधर्मः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उर्वशी—चिरस्यार्यां दृष्ट्वाधिकतरमवितृष्णास्मि । न शक्नोमि विस्रष्टुम् । अन्याय्यमुपरोद्धुम् । गच्छत्वार्या पुनर्दर्शनाय ।

राजा—अम्ब ! भगवते च्यवनाय मां प्रणिपातय ।

तापसी—एवं भवतु ।

कुमारः—आर्ये ! सत्यं यदि निवर्तसे मामप्याश्रमं नेतुमर्हति ।

राजा—अयिवत्स ! उषितं त्वया पूर्वस्मिन्नाश्रमे । द्वितीयमध्यासितुं तव समयः

तापसी—जात ! गुरोर्वचनमनुतिष्ठ ।

कुमारः—तेन हि,

यः सुतवान् मदङ्के शिखण्डकण्डूयनोपलब्धसुखः ।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम् ॥

तापसी—(विहस्य) एवं करोमि । स्वस्ति भवतु युष्मभ्यम् ।

(इति निष्क्रान्ता)

(विक्रमोर्वशीयम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शब्दार्थाः

1. अम्ब = ஓ அன்னையே !
2. अभिवादये = நமஸ்கரிக்கின்றேன், வணங்குகின்றேன்.
3. अनाख्यातः சொல்லப்படாதவன். (சொல்லாமலேயே)
4. न्यासीकृतः = அடமானமாக வைக்கப்பட்ட
5. अशेषम् = ஸம்பூர்ணமாக. (மிச்சமில்லாமல்)
6. निलीयमानः = மறைந்திருக்கின்ற.
7. परिष्वज्य = தழுவிக் கொண்டு.
8. शिखण्डकः = சிகை வைத்திருப்பவன். (குடுமிவைத் திருப்பவன்)
9. उत्सङ्गः = மடி.
10. आस्यताम् = உட்கார். (உட்காருங்கள்)
11. निर्यातितः = திருப்பிக் கொடுக்கப்பட்டது.
12. हस्तनिक्षेपः = ஒப்படைக்கப்பட்ட பொருள்.
13. उपरुध्यते = தடைப்படுகிறது.
14. विसृष्टुम् = விடுவதற்கு.
15. उषितम् = வசிக்கப்பட்டது.
16. अध्यासितुम् = பிரவேசிபபதற்கு, நுழைவதற்கு.
17. अनुतिष्ठ = நடந்து கொள்
18. निष्क्रान्ता = வெளியே சென்றாள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 18

மூன்றுவது கணத்தைச் சேர்ந்த பரஸ்மைபத தாதுக்கள்.

1. ह्री = (ह्री = लज्जायां) வெட்கப்படுதல்
   जिह्रेति, जिह्राय, जिह्रयांचकार, ह्रेता, ह्रेष्यति।
2. हु = (हु = दानादनयोः) ஹோமம் செய்தல்.
   जुहोति, जुहाव, जुहवांचकार, होता, होष्यति।
3. हा = (ओ हाक् = त्यागे) தியாகம் பண்ணுதல், துறந்து விடுதல்.
   जहाति, जहौ, हाता, हास्यति।
4. भी = (ञिभी = भये) பயப்படுதல்.
   बिभेति, बिभाय, बिभयांचकार, भेता, भेष्यति।
5. पृ = (पृ = पालनपूरणयोः) காப்பாற்றுதல், பூரண மாக்குதல், நிரப்புதல்.
   पिपर्ति, पपार, परिता, परिष्यति।
6. गा = (गा = स्तुतौ) துதி பாடுதல்.
   जिगाति, जगौ, गाता, गास्यति।

மூன்றுவது கணத்தைச் சேர்ந்த உபயபத தாதுக்கள்.

1. दा = (डुदाञ् = दाने) கொடுத்தல்.
   ददाति, दत्ते, ददौ, ददे। दाता दास्यति, दास्यते।
2. धा = (डु धाञ् = धारणपोषणयो) தரிப்பது.
   दधाति, धत्ते। दधौ, दधे। धाता। धास्यति, धास्यते।
3. भृ = (डु भृञ् = धारणपोषणयो) தரிப்பது.
   बिभर्त्ति, बिभृते। बभार, बभ्रे, बिभरांचकार, बिभरांचक्रे। भर्ता। भरिष्यति, भरिष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. विष् = (विष्लृ = व्याप्तौ) பிரிந்து இருத்தல்.
वेवेष्टि, वेविष्टे। विवेष, विविषे। वेष्टा। वेक्ष्यति, वेक्ष्यते।

மூன்றாவது கணத்தின் ப்ரஸ்மைபத தாதுக்கள்.

பரஸ்மை பதம்

लट् = (वर्तमानकालः) (நிகழ்காலம்)

(डुदाञ् = दाने = கொடுத்தல்)

ஒருமை.	இருமை.	பன்மை.	
ददाति	दत्तः	ददति	ப்ரதம புருஷன்.
ददासि	दत्थः	दत्थ	மத்யம புருஷன்.
ददामि	दद्वः	दद्मः	உத்தம புருஷன்.

ஆத்மனே பதம்

दत्ते	ददाते	ददते	ப்ரதம புருஷன்.
दत्से	ददाथे	दद्ध्वे	மத்யம புருஷன்.
ददे	दद्वहे	दद्महे	உத்தம புருஷன்.

பரஸ்மை பதம்

लोट् = आज्ञार्थः

(கட்டளை)

ददातु दत्ताद्	दत्ताम्	ददतु	ப்ரதம புருஷன்.
देहि दत्तात्	दत्तम्	दत्त	மத्यम புருஷன்.
ददानि	ददाव	ददाम	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ஆத்மனே பதம்

दत्ताम्	ददाताम्	ददताम्	ப்ரதம புருஷன்.
दत्स्व	ददाथाम्	दध्वम्	மத்யம புருஷன்.
ददै	ददावहै	ददामहै	உத்தம புருஷன்.

பரஸ்மை பதம்

लङ् = (भूतकालः) (இறந்த காலம்)

अददात्	अदत्ताम्	अददुः	ப்ரதம புருஷன்.
अददाः	अदत्तम्	अदत्त	மத்யம புருஷன்.
अददाम्	अदद्व	अदद्म	உத்தம புருஷன்.

ஆத்மனே பதம்

अदत्त	अददाताम्	अददत	ப்ரதம புருஷன்.
अदत्थाः	अददाथाम्	अदध्वम्	மத்யம புருஷன்.
अददि	अदद्वहि	अदद्महि	உத்தம புருஷன்.

பரஸ்மை பதம்

लिङ् = (विध्यर्थः) (விதி)

दद्यात्	दद्याताम्	दद्युः	ப்ரதம புருஷன்.
दद्याः	दद्यातम्	दद्यात	மத்யம புருஷன்.
दद्याम्	दद्याव	दद्याम	உத்தம புருஷன்.

ஆத்மனே பதம்

ददीत	ददीयाताम्	ददीरन्	ப்ரதம புருஷன்.
ददीथाः	ददीयाथाम्	ददीध्वम्	மத்யம புருஷன்.
ददीय	ददीवहि	ददीमहि	உத்தம புருஷன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.